# ॥ धन्वन्तर्यष्टोत्तरशतनामस्तोत्रम् ॥

## ॥ ध्यानम् ॥

शङ्खं चक्रं जलौकां दधदमृतघटं चारुदोर्भिश्चतुर्भिः
सूक्ष्मस्वच्छातिहृद्यांशुक-परिविलसन्मौलिमम्भोजनेत्रम् ।
कालाम्भोदोज्ज्वलाङ्गं कटितटविलसच्चारूपीताम्बराढ्यं
वन्दे धन्वन्तरिं तं निखिलगदवनप्रौढदावाग्निलीलम् ॥

## ॥ स्तोत्रम् ॥

धन्वन्तरिः सुधापूर्णकलशाढ्यकरो हरिः ।
जरामृतित्रस्तदेवप्रार्थनासाधकः प्रभुः ॥ १ ॥

निर्विकल्पो निस्समानो मन्दस्मितमुखाम्बुजः ।
आञ्जनेयप्रापिताद्रिः पार्श्वस्थविनतासुतः ॥ २ ॥

निमग्नमन्दरधरः कूर्मरूपी बृहत्तनुः ।
नीलकुञ्चितकेशान्तः परमाद्भुतरूपधृत् ॥ ३ ॥

कटाक्षवीक्षणाश्वस्तवासुकिः सिंहविक्रमः ।
स्मर्तृहृद्रोगहरणो महाविष्ण्वंशसम्भवः ॥ ४ ॥

प्रेक्षणीयोत्पलश्याम आयुर्वेदाधिदैवतम् ।
भेषजग्रहणानेहस्स्मरणीयपदाम्बुजः ॥ ५ ॥

नवयौवनसम्पन्नः किरीटान्वितमस्तकः ।
नक्रकुण्डलसंशोभिश्रवणद्वयशष्कुलिः ॥ ६ ॥

दीर्घपीवरदोर्दण्डः कम्बुग्रीवोऽम्बुजेक्षणः ।
चतुर्भुजः शङ्खधरश्चक्रहस्तो वरप्रदः ॥ ७ ॥

सुधापात्रोपरिलसदाम्रपत्रलसत्करः ।
शतपद्याढ्यहस्तश्च कस्तूरीतिलकाञ्चितः ॥ ८ ॥

सुकपोलः सुनासश्च सुन्दरभ्रूलताञ्चितः ।
स्वङ्गुलीतलशोभाढ्यो गूढजत्रुर्महाहनुः ॥ ९ ॥

दिव्याङ्गदलसद्बाहुः केयूरपरिशोभितः ।
विचित्ररत्नखचितवलयद्वयशोभितः ॥ १० ॥

समोल्लसत्सुजातांसश्चाङ्गुलीयविभूषितः।
सुधागन्धरसास्वादमिलद्भृङ्गमनोहरः ॥ ११ ॥

लक्ष्मीसमर्पितोत्फुल्लकञ्जमालालसद्गलः ।
लक्ष्मीशोभितवक्षस्को वनमालाविराजितः ॥ १२ ॥

नवरत्नमणीक्लृप्तहारशोभितकन्धरः ।
हीरनक्षत्रमालादिशोभारञ्जितदिङ्मुखः ॥ १३ ॥

विरजोऽम्बरसंवीतो विशालोराः पृथुश्रवाः।
निम्ननाभिः सूक्ष्ममध्यः स्थूलजङ्घो निरञ्जनः ॥ १४ ॥

सुलक्षणपदाङ्गुष्ठः सर्वसामुद्रिकान्वितः।
अलक्तकारक्तपादो मूर्तिमद्वार्धिपूजितः ॥ १५ ॥

सुधार्थान्योन्यसंयुध्यद् देवदैतेयसान्त्वनः।
कोटिमन्मथसङ्काशः सर्वावयवसुन्दरः ॥ १६ ॥

अमृतास्वादनोद्युक्तदेवसङ्घपरिष्टुतः।
पुष्पवर्षणसंयुक्तगन्धर्वकुलसेवितः ॥ १७ ॥

शङ्खतूर्यमृदङ्गादिसुवादित्राप्सरोवृतः ।
विष्वक्सेनादियुक्पार्श्वः सनकादिमुनिस्तुतः ॥ १८ ॥

साश्चर्यसस्मितचतुर्मुखनेत्रसमीक्षितः ।
साशङ्कसम्भ्रमदितिदनुवंश्यसमीडितः ॥ १९ ॥

नमनोन्मुखदेवादिमौलीरत्नलसत्पदः ।
दिव्यतेजःपुञ्जरूपः सर्वदेवहितोत्सुकः ॥ २० ॥

स्वनिर्गमक्षुब्धदुग्धवाराशिर्दुन्दुभिस्वनः।
गन्धर्वगीतापदानश्रवणोत्कमहामनाः ॥ २१ ॥

निष्किञ्चनजनप्रीतो भवसम्प्राप्तरोगहृत्।
अन्तर्हितसुधापात्रो महात्मा मायिकाग्रणीः ॥ २२ ॥

क्षणार्धमोहिनीरूपः सर्वस्त्रीशुभलक्षणः।
मदमत्तेभगमनः सर्वलोकविमोहनः ॥ २३ ॥

स्रंसन्नीवीग्रन्थिबन्धासक्तदिव्यकराङ्गुलिः।
रत्नदर्वीलसद्धस्तो देवदैत्यविभागकृत् ॥ २४ ॥

सङ्घ्यातदेवतान्यासो दैत्यदानववञ्चकः।
देवामृतप्रदाता च परिवेषणहृष्टधीः॥२५॥

उन्मुखोन्मुखदैत्येन्द्रदन्तपङ्क्तिविभाजकः।
पुष्पवत्सुविनिर्दिष्टराहुरक्षःशिरोहरः ॥२६॥

राहुकेतुग्रहस्थानपश्चाद्गतिविधायकः ।
अमृतालाभनिर्विण्णयुध्यद् देवारिसूदनः॥२७॥

गरुत्मद्वाहनारूढः सर्वेशस्तोत्रसंयुतः।
स्वस्वाधिकारसन्तुष्टशक्रवह्न्यादिपूजितः॥२८॥

मोहिनीदर्शनायातस्थाणुचित्तविमोहकः ।
शचीस्वाहादिदिक्पालपत्नीमण्डलसन्नुतः॥२९॥

वेदान्तवेद्यमहिमा सर्वलोकैकरक्षकः।
राजराजप्रपूज्याङ्घ्रिश्चिन्तितार्थप्रदायकः॥३०॥

धन्वन्तरेर्भगवतो नाम्नामष्टोत्तरं शतम्।
यः पठेत्सततं भक्त्या नीरोगः सुखभाग्भवेत्॥३१॥

॥इति बृहद्ब्रह्मानन्दोपनिषदान्तर्गतं श्री-धन्वन्तर्यष्टोत्तरशतनामस्तोत्रं सम्पूर्णम्॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Dhanvantari_Ashtottara_Shatanama_Stotram.

generated on **March 29, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits